धीतपोबलिनां चाहम् । धीस्तपो बलमेव च । त्रिविधेषु विकारेषु । मदुत्पन्नेष्यहं स्थितः ॥ ८॥

यो मे तत्त्वं विजानाति । मोहं त्यजति सोऽखिलम् । अनेकृर्जन्मभिक्षेवम् । ज्ञात्वा मां मुच्यते ततः ॥ ९॥

अन्ने नानाविधान् देवान् । भजन्ते तान् वजन्ति ते यथा यथा मतिं कृत्वा । भजते मां जनोखिलः ॥ १०॥

तथा तथास्य तं भावम् । प्रयाम्यहमेव तम् । अहं सर्वं विजानामि । मां न कश्चित् विबुध्यते ॥ ११॥

यः शृत्वा त्यजति प्राणम् । अन्ते मां श्रद्धयान्वितः स यात्यपुनरावृत्तिम् । प्रसादान्मम भूभुज! ॥ १२॥

९९९??

अहिंसा प्रथमं पुष्पम् । पुष्पमिन्द्रिय निग्रहः । सर्वभूतदया पुष्पं क्षमापुष्पं विशिष्यते ॥ १८॥

शमः पुष्पं तपः पुष्पम् । ध्यानं पुष्पं तथैव च । सत्यं चैवाष्टमं पुष्पम् । एतस्तुति देवताम् ॥ १९॥

श्रवणं कीर्तनं देव्याः । स्मरणं पादसेवनम् । अर्चनं वन्दनं दास्यम् । सख्यमात्मनिवेदनम् ॥ २०॥

इति पुंसार्चिता देव्याः । भक्तिस्तु नवलक्षणा । क्रियते भगवत्यर्थि । तन्नन्नेम्भीष्टमुत्तमम् ॥ २१॥

न्यासं च मूलमन्त्रस्य । ततो ध्यात्वा जपेन्मनसि । स्थिरचित्तो जपेन्मन्त्रम् । यथा गुरुमुखागतम् ॥ २२॥

जपं निवेद्य देवाय । श्रुत्वा स्कोरनेकधा । एवं मां य उपासीत । स लभेत् मोक्षमव्ययम् ॥ २३॥

कुसुमार्य उवाचः अनन्यभावास्कां सम्यक् । मूर्तिमन्तमुपासते । योत्परं परमव्यक्ता । तयोःकस्ते मतोऽधिकः ॥ २४॥

देव्युवाचः यो मां मूर्तिधरं भक्ता । मध्यक्तः परिषेवते । स मे मान्नोऽनन्य भक्तः । नियुज्य हृदयं मयि ॥ २५॥

खगणं स्ववशं कृत्वा । अखिलभूत हितार्थकृत् । धैयमक्षर मव्यक्तम् । सर्वगं कूटगं स्थिरम् ॥ २६॥

अव्यक्टोपासना दुःखम् । अधिकं तेन लभ्यते । व्यक्तख्योपासनात् साध्यम् । तदेवाव्यक्त भक्तितः ॥ २७॥

भक्तिश्चवादरश्चात्र । कारणं परमं मतम् । सर्वेषां विदुषां श्रेष्ठो । किञ्चितज्ज्योऽपि भक्तिमान् ॥ २८॥

महापण्डितरिगिन्तलू एनू तिळियद पामरनु भक्ति तत्परनादरे मत्तू श्रेष्ठने शुकाद्यांसनकाद्यात्व । पुरा मुक्ता हि भक्तितः । भव मामनुप्राप्ताः । नारदाद्याक्टिरायुषः ॥ २९॥

अतो भक्त्या मयि मनो । निधेहि बुद्दिमेव च । भक्त्या मां यजस्व राजन्! । ततो मामेव यास्यसि ॥ ३०॥

मद्भक्तान्नोजयेत् प्रीत्या । तथा चैव सुवासिनी । कुमारीर्वटकांश्चापि । मद्बुद्दा मद्यतान्तर ॥ ३१॥

मार्गास्तयो मे विख्याता । मोक्षप्राप् विशांवर! कर्मयोगो ज्ञानयोगो । भक्तियोगश्च भूमिप !॥ ३२॥

तयाणामप्लयं योग्यः । कर्तुं० शक्टोऽस्ति सर्वदा । सुलभत्वान्मानसत्वात् । कायचित्ताद्यपीडनात् ॥ ३३॥

गुणभेदान्ननुष्याणाम् । सा भक्तिस्तिविधाः मताः । परपीडां समुद्दिश्य । दम्भं कृत्या पुरस्परम् । मात्पर्य क्रोधयुक्रो यः । तस्य भक्तिस्तु तामसी ॥ ३४॥

परपीडादिरहितः । स्वकल्याणार्थमेव च नित्यं सकामो हृदये । यशोर्थि भोगलोलुपः । तत्तत्पल समापैर्मामुपास्सेस्ति भक्तितः ॥ ३५॥

भेदबुद्वा तु मां स्वस्थादन्यां जानाति पामरः । तस्य भक्तिस्समाख्याता विशाधिप तु राजसी ॥ ३६॥

परमेशार्पणं कर्म । पापसंक्षाळनाय च । वेदोक्त त्वादवश्यं तत् । कर्तव्यं तु मयानिशम् ॥ ३७॥

इति निश्चित बुद्धिस्तु । निर्भेदबुद्धिमाश्रितः । करोति प्रीतये कर्मभक्तिस्सा नृप सात्विकी ॥ ३८॥

पूजयेन्मां प्रयत्नन । तत्तदिष्टफलं लभेत् । मद्भक्तो मत्परस्पर्व । सङ्गहीनो मदर्चकृत् । निद्रोध सर्वभूतेषु । समो मामेति भूभुज ! ॥ ३९॥

क्रोधरहितनु सर्वभूतगळल्लि समभावदिन्दिरुववनु नन्नन्नु सेरबल्लनु राजेन्द्रने! मत्परा ये मदासक्त चित्ता भक्तवरा मताः । प्रतिजाने भवादस्मात् । उद्धराम्यचिरेण तु ॥ ४०॥

ॐ तत्सदिति श्रीवासविदेवीगीतायां ब्रह्मविद्यायां योगशास्त्र भक्तियोगोनाम नवमोऽध्यायः ।

## १०

अथ दशमोऽध्यायः ।

९९९??

एतज्ज्ञानथ सदसद्वरेण्यम् । परं विज्ञानाद्वरिष्ठं पजानाम् ॥ ३॥

यदर्चितमध्यदणुभ्रूणुच । यस्मिन् लोका निहितालोकिनश्च

९९९??

तदेतदक्षरं ब्रह्म । सप्राणस्तदस्तु वानः । तदेतत्सत्यममृतम् । तथैद्धव्यं विद्धि हे नृप ! ५॥

प्रणवो धनुश्यरो ह्यात्मा । ब्रह्म तल्लक्षमुच्यते ॥

अप्रमत्तेन भेद्दव्यम् । शरवत्तन्मयो भवेत् ॥ ६॥

यस्मिन् दैश्च पृथिवी चान्तरिक्षं ओतं मनस्सह प्राश्च सर्वैः ॥ ७॥

तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चथामृतस्येष हेतुः ॥ ८॥

ओमित्येवं ध्यायेतात्मानम् । स्वस्तिवः पाराय तमसः परस्तात् । दिव्य ब्रह्मपुरेवाम्मि । आत्मनि संप्रतिष्ठितः ॥ ९॥

हिरण्मये परे कोशे । विरजं ब्रह्मनिष्कळम् । तच्चुभं ज्योतिषां ज्योतिः । तद्यदात्मविदो विदुः ॥ १०॥

न तत्र सूर्योभाति न चन्द्र तारकम् । नेमा विद्युतो भान्ति कुतोऽयमग्निः; तमेव भान्तमनुभाति सर्व० तस्य भासा सर्वमिदं विभाति ॥ ११॥

ब्रह्मैवेदममृतं पुरस्ताह्म पश्याद्दष्ट दक्षिणतष्टोत्तरेण अधक्टोर्व्वं च प्रकृतम् । ब्रह्मैवेदं विश्वं वरिष्ठम् ॥ १२॥

एताद्दगनुभवो यस्य । सकृतार्थो नरोत्तम ! ब्रह्मभूतः प्रसन्नात्मा । न शोचति न काङ्क्षति ॥ १३॥

द्वितीया भयं राजन्! । तदभावादि चेति न । स तद्वियोगो मेष्यस्ति । मयोगोऽपि तस्य न ॥ १४॥

अहमेव स सोषं वै । निश्चितं विद्दि सन्मतिः । मद्दर्शनं तु तत्र स्यात् । यत्र ज्ञानी स्थितो मनु ॥ १५॥

ॐ क्रीं श्रीं नाहं तीर्थ न कैलासे । वैकुण्ठ वास कुत्रचित् । वसामि किं तु मद्ज्ञानी । हृदयाम्बुज मध्यमे ॥ १६॥

मत्तूजाकोटि फलदम् । सकृन्मानिनोर्चनम् । कुलं पवित्रं तस्यास्ति । जननी कृतकृत्यका ॥ १७॥

योगशास्त्र ब्रह्मविद् ब्रह्मतत्त्व समैक्यतासाधनयोगोनाम दशमोऽध्यायः ।

## ११

श्री वासविदेवीगीता अथ एकादशोऽध्यायः ।
युगधर्म प्रबोधयोगः देव्यवाचः महाद्भुतं विशिष्टं च । विषयं शृणु भूपते! । मम दिव्यसम्भूतिस्य । रहस्यं तु कलौ युगे देवि ॥ १॥

अहमेव परम्ब्रह्म । महारुद्रोह मेव च । अहमेव जगत्सर्वम् । स्थावरं जङ्गमं च यत् ॥ २॥

अधर्म सञ्चयो धर्मा । सञ्चयो हि यदा भवेत् । साधून् संरक्षितुं दुष्टान् । ताडितुं सम्भवाम्यहम् ॥ ३॥

उच्चिद्याधर्म निचयं धर्म संस्थापयामि च । हन्नि दुष्टांश्च दैत्यांश्च । नाना लीलाकरो मुदा ॥ ४॥

वर्णाश्रमान् मुनीन् साधून् । पालये बहुरूपद्दक् । एवं यो वे सम्भूतम् । मम दिव्यां युगे युगे ॥ ५॥

घोरे कलियुगे प्राप्ताः । हिंसाधर्म निरङ्कुशाः । त्रिमूर्तयोऽथात्यन्तम् । व्याकुलाः कर्तव्यमूढया । मां पराशक्तिं च संप्रार्थ्य । एवं विज्ञापितास्तदा ॥ ६॥

हे देवि! भक्तवरदे । सृष्टिस्थितिलयकारिणि । अम्बिके! दौष्टनाशार्थम् । शिष्टसंरक्षणाय च । ऊदाज्ञया वयं भूम् । अवतारामो युगे युगे ॥ ७॥

घोरेसिन् कलियुगे । भ्रष्टा; अद्य नराःखभवन् अधर्म निरतास्पर्वे । राजानश्च निरङ्कुशाः ॥ ८॥

ते सर्वे यदि हन्नेयुर् । भवेद्दाश्री स्मशानवत् । अतः कर्तव्यमूढानाम् । उपदेशय सत्पथम् ॥ ९॥

एवं त्रिमूर्तिभिः पृष्या । अहमुवाचह यथा । विचारं परित्यजन्तो । भवन्तु लोकपालकाः ॥ १०॥

भवद्दिर्दुष्टसंहार । णे हिंसाविधिराश्रिता । युगेन् अनुसरणीयो । अहिंसा मार्गमेव च ॥ ११॥

सहृदयं सौमनस्यम् । विद्वेषं करोमि वः । अन्नो अन्यमभिहर्यत । वत्सं जातमिवा गौ ॥ १२॥

उतदेवा अवहितम् । देवा उन्न यथा पुनः । उतागश्यकृषं देवा । देवा जीव यथा पुनः ॥ १३॥

यस्तु सर्वाणि भूतानि । आत्मवानुपश्यति । सर्वभूतेषु चात्मानम् । ततो न विचिकित्सति ॥ १४॥

अहिंसा परमो धर्मः । सर्वप्राणभतां स्टतः । तस्मात् प्राणभ्यतः सर्वान् । अहिंस्काद् ज्ञानवान् क्वचित् ॥ १५॥

न वेदैर्न च दानैश्च । न तपोभिर्न चाल्वरैः । कदाचित् सतिं यान्ति । पुरुषाः प्राणिहिंसकाः ॥ १६॥

पुरामि मया यथा चोक्तम् । मद्क्ताय समाधिये । तत्पकारेणैवाहम् । उद्भविष्य कल् युगे ॥ १७॥

समाधिस्तु ऋषिस्तावद् । इदानीं कुसुमनामकः । मां पूजयन्नेवास्ति । पृथिवीं पालयस्सदा ॥ १८॥

तत्तुताहं भवेयं च । वासवी नामिका भुवि । ततोहं नूतृविधिना । चाशिंसा मार्गरूपिणा ॥ १९॥

त्यागाधारिणा तेन । करिष्टे निष्कलुषं जगत् । एष्टेवाहिंसा विद्यः । अनुसरणीया कि युगे । एतद्दिन्न विधिस्तावत् । सर्वथात्रासमञ्जसः ॥ २०॥

९९९??
ॐ क्रीं श्रीं अहमेव गणनाथः । जातः पञ्चविधाः पुरा । अज्ञानात् मां न जानन्ति । जगत्कारण कारणम् ॥ २५॥

मत्तोस्द्विराषो धरणि । मत्तः आकाशमारुत । ब्रह्मविष्णुश्चरुद्रश्च । लोकपालाः दिशोदश ॥ २६॥

वसवो मुनयो गावो । मनवः पशवोऽपि च । सरितस्सागराः यक्षाः । वृक्षाः पक्षिगणा इव ॥ २७॥

यच्चकिञ्चित् क्वचिद्वस्तु । दृश्यते शूयतेऽपि वा । अन्तर्बहिश्च तत्सर्वम् । व्याप्याहं सर्वदा स्थिता ॥ २८॥

तथैकविंशति स्वर्गाः । नागास्पष्ठवनानि च मनुष्याः पर्वतास्साध्याः । सिद्धा रक्षेगणास्तथा ॥ २९॥

ॐ तत्सदिति श्रीवासविदेवीगीतायां ब्रह्मविद्यायां योगशास्त्र युगधर्मप्रबोधयोगोनाम एकादशोऽध्यायः ।

## १२

श्री वासविदेवीगीता अथ द्वादशोऽध्यायः ।
देवीविश्वरूप सन्दर्शनयोगः कुसुमार्य उवाचः यथा वदसि देवेशि । समष्टावपुदम् । तथैव द्रष्टुमिच्छामि । यदि देवि कृपामयि! ॥ १॥

कुसुमार्यनिन्तेन्दनुः अथ भक्तमतं ज्ञात्वा । कन्यका भक्तकामदा । अदर्शय विराड्रूपम् । भक्तकामप्रचूरिणी ॥ २॥

अपश्यंसे महादेव्या । विराडूपं परात्वरम् । दैर्मस्तकं भवेद्यस्य । चन्द्रर्सू च चक्षसी ॥ ३॥

दिशक्षोते वचो वेदाः । प्राणो वायु प्रकीर्तितः । विश्वं हृदयमित्याहुः । पृथिवी जघनं स्मृतम् ॥ ४॥

नभस्सलं नाभिसरो । ज्योतिश्चक्रमुलम् । महर्लोकस्तु ग्रीवा स्याद् । जनोलोकं मुखं स्टतम् ॥ ५॥

अपोलोको ललाटस्तु । सत्यलोकाद् अधःस्थितः । इन्द्रादयो बाहवस्सु शब्दस्तोत्रं महेशितुः ॥ ६॥

नासत्यद नाने स्फो । गन्धो फ्याणं महेशितुः । मुखमग्नि स्पमाख्यातो । दिवाराव चक्षुणी ॥ ७॥

ब्रह्मस्थानं भूविजृम्भोऽट् व्यापस्तालुः प्रकीर्तिताः । रसो जिह्वा समाख्याता । यमो दंष्टाः प्रकीर्तिताः ॥ ८॥

दन्तासोहकला यस्य । हासो माया प्रकीर्तिता । सर्गपाङ्ग मोक्षस्याद् । वीडोर्थैष्टो महेशितुः ॥ ९॥

मेलिन तुटियायितो लोभस्यादधरोष्टोऽस्या । दधर्ममार्गस्तु पृष्टभूः । प्रजापतिश्च मेढं स्यात् । यस्सष्टा जगतीतले ॥ १०॥

अधो अङ्गवायितो कुक्षिस्पमुद्राः गिरयोऽ स्टेनि देव्या महेशितुः । नद्यो नाड्कस्समाख्याता । वृक्षाः केशाः प्रकीर्तिताः ॥ ११॥

कौमार यौव्वन जरा । वयोऽस्या गतिरुत्तमा । वलाहकास्तु केशास्सुः । सन्ध्ये ते वासवि विभो ॥ १२॥

राजन् श्री जगदम्बाया शृन्द्रमास्तु मनस्थतः । विज्ञानशक्तिस्तु हरिः । रुद्रोन्तःकरणं तम् ॥ १३॥

अश्वादि जातयस्सर्वा । श्लोणिदेशे स्थिता विभोः । अतलादि महालोकाः । कट्यधोभागतां गताः ॥ १४॥

एतेद्दशं महारूपम् । ददर्श वैश्यपुङ्गवः । ज्वालामाला सहस्राड्यम् । लेलिहासं च जिह्वया ॥ १५॥

दंष्टाकटकटारावम् । वमन्तं वमक्षिभिः । नानायुधधरं वीरम् । सर्वप्राग्यूशनं च यत् ॥ १६॥

सहस्र शीर्षनयनम् । सहस्रचरणं तथा । कोटिसूर्य प्रकाशम् । विद्युत्कटि समप्रभम् ॥ १७॥

भयङ्करं महाघोरम् । हृदकोस्तासकारकम् । सन्दृष्टातु कुसुम्भार्य । हाहाकारं च चक्रिरे ॥ १८॥

विकम्पमान हृदयः । मूर्छामापुर्दुरत्ययम् । स्टरणं च गतं तेषाम् । जगदाम्बेय मित्यपि ॥ १९॥

अथ ते धैर्यमालम्ब्य । लज्ञा च स्मतिमुत्तमम् । प्रेमाश्रुपूर्णनयनः । रुद्रकण्ठस्तु भूपतिः । बाष्पगद्दया वाचा । स्तोतुं समुपचक्तिरे ॥ २०॥

कुसुमश्रेष्ठि उवाचः अपराधं क्षमस्वाम्ब । पाहि दीनां सत्तोद्दवे । कोपं संहार देवेशि । सभया रूपदर्शनात् का ते स्तुतिः प्रकर्तव्या । पामरैर्नृपतीरिह ॥ २१॥

नमस्ते भुवनेशानि । नमस्ते पणवातृके । सर्ववेदान्त संसिद्दे । नमो क्रीङ्कारमूर्तये ॥ २२॥

यस्मादग्नि समुत्पन्नो । यस्मात्तूर्यश्चचन्द्रमाः । यस्कादोषधयस्सर्वाः । तस्य सर्वात्मने नमः ॥ २३॥

यस्काच्च देवा सम्भूताः । साध्याः पक्षिणश्लेव च । पशवश्च मनुष्याश्च । तस्ये सर्वात्मने नमः ॥ २४॥

देवीं वाचमजनयन्त देवा । स्ना विश्वरूपाः पशवो वदन्ति । सा नो मन्द्वेष मूर्जन्दुहाना । धेनुर्वागस्कानुपसुप्पतैतु ॥ २५॥

नमो विराट्टरूपि । नमो सूत्रात्यमूर्तये । नमो अव्याकृतरूपि । नमः श्री ब्रह्ममूर्तये ॥ २६॥

नमस्तत्वद् लक्षार्था०। चिदेकरसरूपिणीम् । अखण्डानन्दरूपां ताम् । वेदतात्पर्य भूमिकाम् ॥ २७॥

पञ्चकोशातिरिक्तां ताम् । अवस्थात्रय साक्षिणीम् । नमस्टम्पद लक्षार्था०। प्रत्यगात्म स्वरूपिणीम् ॥ २८॥

प्राणापान् वीहियव । तपश्रद्दा ऋतं तथा । ब्रह्मचर्य० विधिशैव । यस्मात्तस्ये नमो नमः ॥ २९॥

यत्तमुद्रा गिरयः । सिन्धवः प्रचरन्ति च । यस्मादोषधयः सर्वा । रसास्तस्ये नमो नमः ॥ ३०॥

यस्काद् यज्ञसमुद्यतो । दीक्षा यूपश्चदक्षिणाः । ऋचो यजूषि सामानि । तस्ये सर्वात्मने नमः ॥ ३१॥

उपसंहर देवेशि । रूपमेतद् अलौकिकम् । तदेव दर्शयास्माकं रूपं सुन्दर सुन्दरम् ॥ ३२॥

इति भीतात्मकः दृष्टा । जगदम्बा कृपार्णवा । सङ्कृत्य रूपं घोरम् । तद्दर्शयामास सुन्दरम् ॥ ३३॥

पाशाङ्कुश वराभीति धरं सर्वाङ्गकोमलम् । करुणापूर्ण नयनम् । मन्दस्मित मुखाम्बुजम् ॥ ३४॥

दृष्टा तत्सुन्दरं रूपम् । तदा भीतिविवर्जितः । शान्तचित्तः प्रणेमस्ते । हर्षगद्दनिस्टनः ॥ ३५॥

ॐ तत्सदिति श्रीवासविदेवीगीतायां ब्रह्मविद्यायां योगशास्त्र देवीविश्वरूप सन्दर्शनयोगोनाम द्वादशोऽध्यायः ।

## १३

ॐ क्रीं श्रीं श्री वासविदेवीगीता अथ त्रयोदशोऽध्यायः ।
देवीपूजाविधि प्रबोधयोगः कुसुमार्य उवाचः कृपया वद मे सर्वम् । तव पूजाविधिं प्रियम् । पुरुषार्थं च फलदं कृतकृत्यायतो नरः ॥ १॥

देव्यवाचः वक्ष्मी पूजाविधिं वत्व ! । अम्बिकाय यथाप्रियम् ॥ २॥

अत्यन्त श्रद्धया सार्थं शृणु वैश्यधराधिप ! देवि नुडिदळुः द्विविधि मम पूजास्यात् ॥ ३॥

बाह्याचाभ्यन्तरापि च । बाह्यापि द्विविधा प्रोक्ता । वैदिकी तान्त्रिकी तथा ॥ ४॥

वैदिक्कर्चापि द्विविधा । मूर्तिभेदेन वत्रक ! वैदिकी वैदिकैः कायाः । वेददीक्षा समन्वितैः तत्र या वैदिकी प्रोक्ता । प्रथमा तां वदाम्यहम् ॥ ५॥

यन्ने साक्षात्परं रूपम् । दृष्टवानसि सुकृती शान्तस्तमाहित मना । दम्भाहङ्कार वर्जितः । तत्परो भव तद्याजी । तदेव शरणं वज ॥ ६॥

तदेवचेतसा पठ्य । जपध्यायस्व सर्वदा । अनन्यया प्रेमयुक्तः । भा मद्यावमाश्रितः ॥ ७॥

९९९??
ध्यानेन कर्मयुक्तन । भक्तिज्ञानेन वा मनः । प्राप्याहं सर्वथा वत्स ! न तु केवल कर्मभिः ॥ ९॥

इत्तं वैदिकपूजा यः प्रथमया विशांवर । स्वरूपयुक्तं संक्षेपात् । द्वितीया यां विधिं ब्रुवे ॥ १०॥

प्रातरुत्थाय शिरसि संस्करेत्पदमुलम् । सुप्रसन्नं स्मरेत्तत्र । श्रीगुरुं निजरूपिणम् । नमस्कृत्य ततो देवीम् । कुण्डलीं संस्करेद्बुधः ॥ ११॥

ध्यायेत्तच्चिखामधे । सच्चिदानन्दरूपिणीम् । मां ध्यायेदथ शौचादि । क्रियास्पर्वास्पमापयेत् ॥ १२॥

अग्निहोत्रं ततो हुत्वा । मत्तीत्यर्थं द्विजोत्तमः । होमान्ते स्वासने स्थित्वा । पूजा सङ्कल्पमाचरेत् ॥ १३॥

भूतशुद्धिं पुरा कृत्वा । मातृकान्यासमेव च । कल्पयेत्सात्मनो देहे । पीठं धर्मादिभिः पुनः ॥ १४॥

जपं समर्प्य श्रीदेवै । ततोऽर्ध्य स्थापनं भवेत् । पात्रासाधनकं कृत्वा / पूजाद्रव्याणि शोधयेत् ॥ १५॥

दिगन्धं च पुरा कृत्वा । गुरुं नत्वा ततः परम् । तदनुज्ञा समादाय । बाह्यपीठ ततः परम् ॥ १६॥

हृदिस्लां भावितां मूर्ति०। मम दिव्यां मनोहराम् । आवाहयेत् ततः पीठ । प्राणस्थापन विद्यया ॥ १७॥

मूलदेवी प्रभारूपा । सर्तव्या अङ्गदेवताः । तत्पभापटल व्याप्तं त्रैलोक्यं च विचिन्तयेत् ॥ १८॥

यन्त्रस्टाना मावृतीनाम् । पूजनं सम्यगाचरेत् । आसनावाहने चार्ध्यम् । पाद्याद्याचमनं तथा ॥ १९॥

स्नानो वासोद्वयं चैव । भूषणानि च सर्वशः । गन्धं पुष्पं यथा योग्यम् । दत्वा देवै स्वभक्तितः ॥ २०॥

गङ्गादिभि सुगन्धोस्तु । तथा पुष्पः सुवासितैः । नैवेद्ये स्तर्पणेशैव । ताम्बूलैर्दक्षिणादिभिः ॥ २१॥

पुनरावृत्तिसहितम् । मूलदेवीं च पूजयेत् । प्रतिवारमशक्तानाम् । शुक्रवारो नियम्यते ॥ २२॥

कवचेन च सूळेन । अहं रुद्रेभिरितिसुधी । हृल्लेखादि महामन्त्रे । स्तोषयेन्मां मुहुर्मुहुः ॥ २३॥

तोषयेन्मां सुप्रसिद्दा नामां साहस्तरेण च । क्षमापये जगद्धात्रीम् । प्रेमाद्र हृदयो नरः ॥ २४॥

पुलकाङ्कित सर्वाङ्गैः १ भाष्परुद्धाक्षि निस्वनः । नृत्यगीतादि घोषण । तोषयेन्मां मुहुर्मुहुः ॥ २५॥

वेदपारायशैव । पुरास्पकलैरपि । प्रतिपाद्यायतोषं वै । तस्मास्तोषयेत्तु माम् ॥ २६॥

नित्य होमं ततः कुर्याद् । वैश्यानांश्च सुवासिनी । वटुकास्पामरानन्यान् । देवी बुद्वा तु पूजयेत् । नत्वा पुनस्कृ हृदये । व्यत्यमेण विसर्जयेत् ॥ २७॥

य एवं पूजयेद्देवीम् । श्रीमद्वासवि कन्यकाम् । विमृशैतदशेषेण । अत्यधिकारानुरूपतः ॥ २८॥

यावदन्तर पूजाया । मधिकारो भवेन्नहि । तावास्याविमां पूजां श्रमे ज्ञातेतु तां त्यजेत् ॥ २९॥

अभ्यन्तरा तु या पूजा । सा तु संविल्लयः स्मृतः । संविदेव परं रूपम् । उपाधिरहितं मम ॥ ३०॥

ॐ क्रीं श्रीं
अन्तसंविधि मरूपे । चेतस्नाप्तं निराश्रयम् । संविरूपातिरिक्तं तु । मिथ्या मायामयं जगत् ॥ ३१॥

अन्तसंसार नाशाय । साक्षिणीमात्यरूपिणीम् । भावयेन्निर्मनस्सेन । योगयुक्तन चेतसा ॥ ३२॥

ॐ तत्सदिति श्रीवासविदेवीगीतायां ब्रह्मविद्यायां योगशास्त्र देवीपूजाविधि प्रबोधयोगोनाम त्रयोदशोऽध्यायः ।

## १४

श्री वासवीदेवी गीता अथ चतुर्दशोऽध्यायः ।
पराशक्ति स्थानव्रतोत्सवादि प्रकटणायोगः कुसुमार्य उवाचः कति स्थानानि देवेशि द्रष्टव्यानि महीतले । मुख्यानि च पवित्राणि ॥ १॥

देवि प्रियतमानि च व्रतान्यपि तथा यानि । तुष्टिदान्युत्सवा अपि । तत्सर्वं वद मे मातः । कृतकृत्यो यतो नरः ॥ २॥

देव्यवाचः सर्वं दृश्यं मम स्थानम् । सर्वे कालाः व्रतात्मकाः । उत्सवास्तर्वकालेषु । यतोषं सर्वरूपिणी ॥ ३॥

देवियु नुडिदळुः
तथापि भक्त वात्सल्यात् । किञ्चिञ्चिदथोच्यते शृणुष्टाऽवहितो भूत्वा । विशवर्यः वचो मम ॥ ४॥

कोलापुरं महास्थानम् । यत्र लक्ष्मिस्सदा स्थिता । मातुः पुरं द्वितीयं च । रेणुकाधिष्ठितं परम् ॥ ५॥

तुलजापुरं तृतीयं च । स्यातृप्तशृङ्गं तथैव च । पिङ्गलाया महास्थानम् । ज्वालामुख्यास्तथैव च ॥ ६॥

शाकाम्बर्याः परं स्थानम् । भ्रामर्याः स्थानमुत्तमम् । श्रीरक्तदन्तिका स्थानम् । दुर्गास्थानं तथैव च ॥ ७॥

विन्ध्याचल निवासिन्या । स्थानं सर्वोत्तमोत्तमम् । अन्नपूर्णा महास्थानम् । काञ्चीपुरमनुत्तमम् ॥ ८॥

भीमादेव्याः परंस्थानम् । विमलास्थानमेव च । श्रीचन्द्रला महास्थानम् । कौशिकी स्थानमेव च ॥ ९॥

नीलाम्बायाः परंस्थानम् । नीलपर्वत मस्तके । जाम्बूनदेश्वरी स्थानम् । तथा श्रीनगरं शुभम् ॥ १०॥

गुह्यकाळ्या महास्थानम् । नेपाळे यत्पतिष्ठितं मीनाक्षाः परमं स्टानम् । यच्चप्रोक्तं चिदम्बरे ॥ ११॥

वेदारण्यं महास्थानम् । सुन्दर्या समधिष्टितम् । एकाम्बरं महास्थानम् । पराशक्ता प्रतिष्ठितम् ॥ १२॥

पराशक्तियाद् भुवनेश्वरियिन्द् प्रतिष्ठितवागिदे) महालसा परंस्थानम् । योगैश्वर्यास्तथैवच तथा नीलसरस्वत्याः । स्थानं चीनेषु विश्रुतम् ॥ १३॥

वैद्यनाथे तु बगला । स्थानं सर्वोत्तमं मतम् । श्रीमद्भभुवनेश्वर्या । मणिद्वीपं मम स्मतम् ॥ १४॥

गायत्याश्च परंस्थानम् । श्रीमत् पुष्कर मीरितम् । अमरेशे चण्डिका स्यात् । प्रभासे पुष्करेक्षणी ॥ १५॥

नैमिशे तु महास्थाने । देवी सा लिङ्गधारिणी । पुरुहूता पुष्कराक्षे । आषाढ च रतिस्तथा ॥ १६॥

चण्डमुण्डी महास्ताने । दण्डिनी परमेश्वरी । भावभूत् भवेद्यतिर् । नाकुले नकुलेश्वरी ॥ १७॥

शाङ्करी तु महाकाळे । शर्वाणी मध्यमाभिधे । केदाराबै महाक्षेते । देवी सा मार्गदायिनी ॥ १८॥

भैरवाय्स् भैरवी सा । गयायां मङ्गला सता स्टाणुप्रिया कुरुक्षेत्र । स्वायम्भुवापि नाकुले ॥ १९॥

अविमुक्त विशालाक्षि । महाभागा महालये । गोकर्णे भद्रकर्णि स्यात् । भद्रा स्याद्दद्रकर्णिके ॥ २०॥

शङ्कुकर्णे ध्वनिः प्रोक्ता । स्फूला स्यात् स्कूलकेश्वरी । ज्ञानिनां हृदयाम्बोजे । हृल्लेखा परमेश्वरी ॥ २१॥

इत्यादीनि च स्थानानि । देव्याः प्रियतमानि च । तत्तक्षेतस्य माहात्मम् । कृत्वा पूर्व विशोत्तमाः । तदुकेन विधानेन । पश्चाद्देवीं प्रपूजयेत् ॥ २२॥

अथवा सर्वक्षेत्राणि । महागिर्या० विशोत्तमा ! तत्र नित्यं वसन् सर्व । दिव्य क्षेत्रा सुषुण्यदाः ॥ २३॥

तानि स्थानानि सम्पश्यन् । जपन्यामेव सन्ततम् । ध्यायन्मां चरणाम्बोजम् । मुत्तो भवति बन्धनात् ॥ २४॥

इमानि क्षेत्र नामानि । प्रातरुत्ताय यः पठेत् । भ भवन्ति पापानि । ये तत्क्षणान्न संशयः ॥ २५॥

अधुना कथयिष्यामि । व्रतानि मम सुव्रताः । नारीभिश्च नरैल्वेव । कर्तव्यानि प्रयत्नतः ॥ २६॥

शुक्रवारं व्रतं चैव । ममाति प्रीतिकारकम् । नवरात्रोत्सवं चैव । व्रतं प्रीतिकरं मम ॥ २७॥

सर्वोत्तमं सत्वलदम् । वासवि कन्यकाव्रतम् । ममाङ्गोपाङ्ग देवता सहितार्चन सद्विधिः ॥ २८॥

द्युत्तर शतकुण्डाड्यम् । कन्यका यज्ञनामकम् । अमोघं सर्वफलदम् । अत्यन्त गुह्यमद्भुतम् ॥ २९॥

एवमन्यान्यपि विशाः । नित्यनैमित्तिकान्यपि । व्रतानि कुरुते यो वै । मत्तीत्यर्थं विमत्सरः । प्राप्नोति मम सायुज्यम् । स मे भक्तस्पमे श्रियः ॥ ३१॥

उत्सवान्नपि कुर्वित । डोलोत्सव मुखासुधी । वैशाख शुद्ध दशम्याम् । कुर्याडोलोत्सवं मम ॥ ३२॥

९९९??॥ ३३॥

कुर्वित तत्पुण्यदिने । मम जनोत्सवं महत् । कुङ्कुमाररु कर्पूर । मणिवस्त्र सुगन्धितैः सद्गन्ध धूपदीपैत्व । दमनेन विशेषतः । आन्दोलयेत्ततो वत्स ! । बाल वासवि कन्यके ॥ ३४॥

मम पट्टाभिषेकस्य । महाद्भुतोत्सवं सुधीः । अत्यन्त वैभवोपेतम् । कुर्याच्चास्तविधानतः ॥ ३५॥

शयनोत्सवं यदा कुर्यात् । तदा जागरणोत्सवम् । रथोत्सवं च मे कुर्यात् । दमनोत्सवमेव च ॥ ३६॥

मद्भक्ताद्दोजयेत् प्रीत्या । तथा चैव सुवासिनी । कुमारीर्वटुकांश्चापि । मद्बुद्वा मद्यतान्तरः । वित्तशान रहितः । यजेदेतान्तुमादिभिः ॥ ३७॥

य एवं कुरुते भक्ता प्रतिवर्षमतन्द्रितः । स धन्यः कृतकृत्योऽस् । मत्तीति पात्रवान् भवेत् ॥ ३८॥

सर्वमुक्तं समासेन । मम प्रीतिदायकम् । नाशिष्याय प्रदातव्यम् । नाभक्ताय कदाचन ॥ ३९॥

ॐ तत्सदिति श्रीवासविदेवीगीतायां ब्रह्मविद्यायां योगशास्त्र पराशक्तिस्थान व्रतोत्सवादि प्रकटणायोगोनाम चतुर्दशोऽध्यायः ।

## १५

श्री वासविदेवीगीता अथ पञ्चदशोऽध्यायः ।

श्री वासविदेवीगीता महत्वयोगः देव्यवाचः न वेदाध्ययनैर्योगै । रैदानैस्तपसेज्यया । रूपं द्रष्टुमिदं शक्यम् । केवलं मत्मपां विना ॥ १॥

विश्वम्भरा पुण्यवती । चिल्लयो यस्य चेतसः । ब्रह्मज्ञानं तु यत्नष्टं त्वया पार्थिवसत्तमः ॥ २॥

इति ते कथितो राजन् ! । प्रसादात् योग उत्तमः । साङ्गोपाङ्ग सविस्तारो । अनादि सिद्दो मया ॥ ३ ॥

इमं गोप्यतमं योगम् । शृणोति श्रद्धया च यः । सोऽपि कैवल्यमाप्नोति । यथा योगी तथैव सः ॥ ४॥

य इमं श्रावयेद्योगम् । कृत्वा सार्थं० सुबुद्धिमान् । यथा योगी तथा सोऽपि । परं निर्वाणमृच्छति ॥ ५॥

योगी तां सम्यगभ्यस्य । ज्ञात्वा चार्थं गुरोर्मुख्यात् । कृत्वा पूजां कन्यकायाः । प्रत्यहं पठते तु यः ॥ ६॥

एककालं द्विकालं वा । त्रिकालं वापि यः पठेत् । ब्रभूतस्य तस्यापि । दर्शनान्मुच्यते नरः ॥ ७॥

विद्यार्थिनो भवेद्विद्या । सुखार्थि सुखमाप्नुयात् । कामानन्यान् लभेत् कामी । मुक्तिमन्ते प्रयान्ति ते ॥ ८॥

गीता रहस्य भूतेयम् । गोपनीया प्रयतृतः । सर्वमुक्तं समासेन । यन्नष्टं तत्त्वयानघ ! ॥ ९॥

कथितं तन्मया सर्वं नातो वक्तव्यमस्ति हि । इदं जेष्ठाय पुत्राय । भक्तियुक्ताय शीलिने । शिष्याय च यथोक्ताय । वक्तव्यं नान्यथा क्वचित् ॥ १०॥

यस्य देवे पराभक्तिः । यथा देवे तथा गुरू । तस्मृते कथिता प्यार्थाः । प्रकाशन्ते महात्मनः । येनोपदिष्टा विद्येयम् । स एव परमेश्वरः ॥ ११॥

यस्याऽयं सुकृतं कर्तुं०। असमर्थस्ततो ऋणी । पित्रोरष्यधिकः प्रोक्तः । ब्रह्मजन्मप्रदायकः ॥ १२॥

पितृजातं जन्ननष्टम् । नेतृजातं कदाचन । तस्ये न द्रोहत्यादि । निगमो प्यवदन्नुधीः ॥ १३॥

तस्मात्सर्व प्रयत्नन । श्रीगुरुं तोषयेत्सुधीः । कायेन मनसा वाचा । सर्वदा तत्परो भवेत् ॥ १४॥

पुनः प्राह तदा देवी । सन्तुष्टा पितरं तदा । भविष्यत्कार्यसंसर्ग । ईक्षस्व स्वचक्षुषा ॥ १५॥

स दर्श ततो वह्नि । प्रवेशं वैश्य सन्तते । विष्णुवर्धन भूपालमरणं तदनन्तरम् ॥ १६॥

काशीयात्रं विरूपाक्ष । स्याधिपत्य महोत्सवम् । हस्तामलकवत्सर्वम् । दृष्टा विस्मितमानसः ॥ १७॥

कुसुम्भः परमामोदम् । जगाम हृदि साम्प्रतम् । दिव्यं रूपं स्वकं त्या । ततस्सा भुवनेश्वरी ॥ १८॥

भूयोऽपि वासवी कन्या । रूपेणासीन्यनोहरा । आवृतः कुसुमश्रेष्ठि । माययाभूत् यथा पुरा ॥ १९॥

सालङ्कायनोवाचः अनेन सदृशं गीता । न भूतं न भविष्यति । सर्वदुःखप्रशमनम् । सर्वसम्पत्ववर्धनम् ॥ २०॥

सर्वापमृत्युशमन मकालमृत्युनिवारणम् । सर्वज्जरार्तिशमनम् । दीर्घायुष्य प्रदायकम् ॥ २१॥

पुत्रप्रदं अपुत्राणाम् । पुरुषार्थ प्रदायकम् । इदं विशेषा व्यास । सुबोधनं शुभप्रदम् ॥ २२॥

जन्मध्ये सकृच्चापि । य ए तत्परते सुधीः । तस्य पुण्यफलं वक्षे । शृणुध्वं विशसत्तम ॥ २३॥

गङ्गादि सर्वतीर्थषु । य स्नाया स्फोटि जन्मसु । कोटिलिङ्ग प्रतिष्ठां च । यः कुर्यादविमुक्तके" ॥ २४॥

कोटि सुवर्ण भारणाम् । स्तोत्रियेषु द्विजन्मसु । यः कोटि हयमेधाना । महरेन्हाङ्ग रोदसि ॥ २५॥

आचरेत्रोपकोटियो । निर्जले मरुभूतले । दुर्भिक्षे यः प्रतिदिनम् । कोटिब्राह्मणभोजनम् ॥ २६॥

श्रद्धया परया कुर्यात् । सहस्त्रं परिवत्ररान् । तप्पुण्यं कोटिगुणितम् । भवेत्पुण्यमनुत्तमम् ॥ २७॥

कन्यका परमेश्वर्याः । गीताज्ञानसुकीर्तनात् । भक्तो यः कीर्तयेन्नित्यम् । इदं कन्याः सुबोधनं तस्ये श्रीवासवि कन्या । प्रीताभीष्टं प्रयच्छति ॥ २८॥

यः पठेतन्यकायास्य । सुगीतां भक्तिसंयुतः । लक्ष्मीश्चाञ्चल्य रहिता । सदा तिष्ठति तद्महे ॥ २९॥

अत्यन्त श्रद्धया नित्यम् । सुगीता यः पठेन्नरः । भारती तस्य जिह्वाग्रे । रङ्गे नृत्य नित्यशः ॥ ३०॥

यस्तु श्री वासवि कन्या । सुगीता श्रवणास्तथा । पठनात्पाठनादेवीम् । अनुनित्यं समर्चयेत् ॥ ३१॥

सर्वान् कामानवापैह । सर्वसौभाग्य संयुतः । पुत्रपौत्रादि संयुक्तो । भुक्ता भोगान्यथेतान् ॥ ३२॥

अन्ते श्री वासवी देव्या । सायुज्यमति दुर्लभम् । प्रार्थनीयं ब्रह्मादैत्व । प्राप्टोत्येव न संशयः ॥ ३३॥

निष्कामः कीर्तयेद्यस्तु । श्रीवासवीं गीता महत् ब्रह्मज्ञानमवास्कोति । येन मुच्यत बन्धनात् ॥ ३४॥

धनार्थि धनमाज्योति । यशोऽर्थि चाप्नुयाद्यशः । विद्यार्थि चाप्नुयाद्विद्याम् । सुगीता पठनाद्भुतम् ॥ ३५॥

नान्हेन सदृशं ग्रन्थम् । भोगमोक्षप्रदं प्रजाः । कीर्तनीयमिदं तस्मात् । योगमोक्षार्थिभिर्नरैः ॥ ३६ ॥

चतुराश्रम निष्टे । कीर्तनीयमिदं सदा । स्वधर्मसमनुष्टान । वैकल्य परिषर्तये ॥ ३७॥

कल् पापैक बहुळे । धर्मानुष्ठान वर्जिते वासवी गीतामुक्ता नृणां नान्यक्षरायणम् ॥ ३८॥

यो भझी वासवी देव्याः । सनित्यं कीर्तयेदिदम् । नान्यथा प्रीयते देवी । कल्पकोटि शतैरपि ॥ ३९॥

पराशक्ति तत्त्व “आत्मावा इदमग्र आसीत्” “सदेव सौमैदमग्र आसीत्” “एकमेवाद्वितीयं ब्रह्म” ॐ तत्सदिति श्रीवासविदेवीगीतायां ब्रह्मविद्यायां योगशास्ते श्री वासविदेवीगीता महत्वयोगो नाम पञ्चदशोऽध्यायः ।

इति श्रीमतिराजेश्वरी गोविन्दराजविरचिता श्रीवासविदेवीगीता समाप्ता ॥

## श्री वासविदेव्यष्टकम् ।

अखण्डविश्वनायिकां तमोपहां श्रीकन्यकां अनन्तमहिमसम्पदां अभीष्टसिद्दिदां सुधां अपूर्वचारित्रान्वितां अतीन्द्रियात्मसुखप्रदां अभूतपूर्वधीयुतां भजाम्यहं अहर्निशम् ॥ १॥

अनन्तजीवकोटिसृष्टिस्थितिविलय विहारिणीं अनादनन्तरूपिणीं सनातनीं मनोन्मनीं अपारप्रेमवारिधीं असीमज्ञानसुखनिधीं अधीरताशुदूरिणीं भजाम्यहं अहर्निशम् ॥ २॥

सुपुत्रकामेष्टियागसुफलरूपयोगिनिं समस्तलोकपावकारुणाब्बपदविराजिनीं स्वधर्मशीलरक्षणार्थमात्तत्याग
सुभाषिणीं सुहासिनीं भजाम्यहं अहर्निशम् ॥ ३॥

विरूपाक्षसोदरीं विवेकज्ञानधारिणीं विरागपूर्णमानिनीं विराट रूपधारिणीं विरिञ्चिविष्णुशिवनुतां सुपूजितां प्रमोदितां विशालनेत्रराजितां भजाम्यहं अहर्निशम् ॥ ४॥

समाधिदत्तवचनपालनार्थजन्मधारिणीं नृपालकुसुमश्रेष्टिमुक्तिदायिनीं निरञ्जनीं कृपाविशेषमोदिनिकुसुमाम्ब
कीर्तिवर्धिनीं सुमूर्तशीलरूपिणीं भजाम्यहं अहर्निशम् ॥ ५॥

त्रितापवदग्धभक्तहृदयखेदहारिणीं त्रिशक्तिरूपधारिणीं वराभयकररञ्जनीं त्रिकालज्ञानिगुरुवरेण्यभास्करार्चि
शुभां त्रिलोकपावनीं सदा भजाम्यहं अहर्निशम् ॥ ६॥

चराचरान्तर्व्यापिनीं सुरासुरान्तर्साक्षिणीं परम्परागतापदापहारिणीं सुवासिनीं यशोदयां सुखोदयां प्रभोदयां महाभयां दयालयां गुणालयां भजाम्यहं अहर्निशम् ॥ ७॥

सदाशुभावदिव्ययानहर्षिणीं सङ्कर्षिणीं सदानुग्रहकरामृताभिलहरि मोददायिनीं दिनेन्द्रकोटिसमप्रभां अघापहां मदापहां सुगीतसुधामोदिनीं भजाम्यहं अहर्निशम् ॥ ८॥

इति श्रीमतिराजेश्वरी गोविन्दराजविरचितं श्रीवासविदेव्यष्टकं सम्पूर्णम् ॥

*Shri Vasavidevi Gita*

pdf was typeset on December 17, 2022

Please send corrections to *sanskrit@cheerful.com*